# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम् ,श्रीदुर्गासप्तशती(एकादश अध्याय)

॥ ॐ ॥

॥ श्री दुर्गायै नमः ॥

अथ श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम् ।

ईश्वर उवाच ।

शतनाम प्रवक्ष्यामि , शृणुष्व कमलानने ।
यस्य प्रसादमात्रेण , दुर्गा प्रीता भवेत् सती ॥ 1॥

ॐ सती साध्वी भवप्रीता, भवानी भवमोचनी ।
आर्या दुर्गा जया चाद्या, त्रिनेत्रा शूलधारिणी ॥ 2॥

पिनाकधारिणी चित्रा, चण्डघण्टा महातपाः ।
मनो बुद्धिरहङ्कारा, चित्तरूपा चिता चितिः ॥ 3॥

सर्वमन्त्रमयी सत्ता, सत्यानन्दस्वरूपिणी ।
अनन्ता भाविनी भाव्या, भव्याभव्या सदागतिः ॥ 4॥

शाम्भवी देवमाता च, चिन्ता रत्नप्रिया सदा ।

सर्वविद्या दक्षकन्या, दक्षयज्ञविनाशिनी ॥ 5॥

अपर्णानेकवर्णा च, पाटला पाटलावती ।
पट्टाम्बर परीधाना, कलमञ्जीररञ्जिनी ॥ 6॥

अमेयविक्रमा क्रूरा, सुन्दरी सुरसुन्दरी ।
वनदुर्गा च मातङ्गी, मतङ्गमुनिपूजिता ॥ 7॥

ब्राह्मी माहेश्वरी चैन्द्री, कौमारी वैष्णवी तथा ।
चामुण्डा चैव वाराही, लक्ष्मीश्च पुरुषाकृतिः ॥ 8॥

विमलोत्कर्षिणी ज्ञाना, क्रिया नित्या च बुद्धिदा ।
बहुला बहुलप्रेमा, सर्ववाहनवाहना ॥ 9॥

निशुम्भशुम्भहननी, महिषासुरमर्दिनी ।
मधुकैटभहन्त्री च, चण्डमुण्डविनाशिनी ॥ 10॥

सर्वासुरविनाशा च, सर्वदानवघातिनी ।
सर्वशास्त्रमयी सत्या, सर्वास्त्रधारिणी तथा ॥ 11॥

अनेकशस्त्रहस्ता च, अनेकास्त्रस्य धारिणी ।
कुमारी चैककन्या च, कैशोरी युवती यतिः ॥ 12॥

अप्रौढा चैव प्रौढा च, वृद्धमाता बलप्रदा ।

महोदरी मुक्तकेशी , घोररूपा महाबला ॥ 13॥

अग्निज्वाला रौद्रमुखी,  कालरात्रिस्तपस्विनी ।
नारायणी भद्रकाली,  विष्णुमाया जलोदरी ॥ 14॥

शिवदूती कराली च , अनन्ता परमेश्वरी ।
कात्यायनी च सावित्री,  प्रत्यक्षा ब्रह्मवादिनी ॥ 15॥

य इदं(म्) प्रपठेन्नित्यं(न्),  दुर्गानामशताष्टकम् ।
नासाध्यं(वँ) विद्यते देवि,  त्रिषु लोकेषु पार्वति ॥ 16॥

धनं(न्) धान्यं(म्) सुतं(ञ्) जायां(म्) , हयं(म्) हस्तिनमेव च ।
चतुर्वर्गं(न्) तथा चान्ते,  लभेन्मुक्तिं(ञ्) च शाश्वतीम् ॥ 17॥

कुमारीं(म्) पूजयित्वा तु,  ध्यात्वा देवीं(म्) सुरेश्वरीम् ।
पूजयेत् परया भक्त्या,  पठेन्नामशताष्टकम् ॥ 18॥

तस्य सिद्धिर्भवेद् देवि,  सर्वैः(स्) सुरवरैरपि ।
राजानो दासतां(यँ) यान्ति,  राज्यश्रियमवाप्नुयात् ॥ 19॥

गोरोचनालक्तककुङ्कुमेव
सिन्दूरकर्पूरमधुत्रयेण ।
विलिख्य यन्त्रं(वँ) विधिना विधिज्ञो
भवेत् सदा धारयते पुरारिः ॥ 20॥

भौमावास्यानिशामग्रे,  चन्द्रे शतभिषां(ङ्) गते ।
विलिख्य प्रपठेत् स्तोत्रं(म्) स , भवेत् सम्पदां(म्) पदम् ॥ 21॥

॥ इति श्रीविश्वसारतन्त्रे दुर्गाष्टोत्तरशतनामस्तोत्रं(म्) समाप्तम् ॥

# श्रीदुर्गासप्तशती (एकादश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ एकादशोऽध्यायः ॥

। ध्यानम् ।

ॐ बालरविद्युतिमिन्दुकिरीटां(न्) तुङ्गकुचां(न्) नयनत्रययुक्ताम् ।
स्मेरमुखीं(वँ) वरदाङ्कुशपाशाभीतिकरां(म्) प्रभजे भुवनेशीम् ॥

ॐ ऋषिरुवाच ॥ 1॥

देव्या हते तत्र महासुरेन्द्रे,
सेन्द्राः(स्) सुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं(न्) तुष्टुवुरिष्टलाभाद्,
विकाशिवक्त्राब्जविकाशिताशाः ॥ 2॥

देवि प्रपन्नार्तिहरे प्रसीद,
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं(न्),

त्वमीश्वरी देवि चराचरस्य ॥ 3॥

आधारभूता जगतस्त्वमेका,
महीस्वरूपेण यतः(स्) स्थितासि ।
अपां(म्) स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ 4॥

त्वं(वँ) वैष्णवी शक्तिरनन्तवीर्या,
विश्वस्य बीजं(म्) परमासि माया ।
सम्मोहितं(न्) देवि समस्तमेतत्,
त्वं(वँ) वै प्रसन्ना भुवि मुक्तिहेतुः ॥ 5॥

विद्याः(स्) समस्तास्तव देवि भेदाः(स्),
स्त्रियः(स्) समस्ताः(स्) सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्,
का ते स्तुतिः(स्) स्तव्यपरा परोक्तिः ॥ 6॥

सर्वभूता यदा देवी, भुक्तिमुक्तिप्रदायिनी ।
त्वं(म्) स्तुता स्तुतये का वा, भवन्तु परमोक्तयः ॥ 7॥

सर्वस्य बुद्धिरूपेण , जनस्य हृदि सं(म्)स्थिते ।
स्वर्गापवर्गदे देवि , नारायणि नमोऽस्तु ते ॥ 8॥

कलाकाष्ठादिरूपेण, परिणामप्रदायिनि ।

विश्वस्योपरतौ शक्ते,  नारायणि नमोऽस्तु ते ॥ 9॥

सर्वमङ्गलमाङ्गल्ये , शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि,  नारायणि नमोऽस्तु ते ॥ 10॥

सृष्टिस्थितिविनाशानां(म्),  शक्तिभूते सनातनि ।
गुणाश्रये गुणमये , नारायणि नमोऽस्तु ते ॥ 11॥

शरणागतदीनार्त- परित्राणपरायणे ।
सर्वस्यार्तिहरे देवि , नारायणि नमोऽस्तु ते ॥ 12॥

हं(म्)सयुक्तविमानस्थे,  ब्रह्माणीरूपधारिणि ।
कौशाम्भः क्षरिके देवि,  नारायणि नमोऽस्तु ते ॥ 13॥

त्रिशूलचन्द्राहिधरे,  महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण , नारायणि नमोऽस्तु ते ॥ 14॥

मयूरकुक्कुटवृते,  महाशक्तिधरेऽनघे ।
कौमारीरूपसं(म्)स्थाने,  नारायणि नमोऽस्तु ते ॥ 15॥

शङ्खचक्रगदाशार्ङ्ग- गृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे,  नारायणि नमोऽस्तु ते ॥ 16॥

गृहीतोग्रमहाचक्रे,  दं(म्)ष्ट्रोद्धृतवसुन्धरे ।

वराहरूपिणि शिवे, नारायणि नमोऽस्तु ते ॥ 17॥

नृसिं(म्)हरूपेणोग्रेण, हन्तुं(न्) दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते, नारायणि नमोऽस्तु ते ॥ 18॥

किरीटिनि महावज्रे, सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि, नारायणि नमोऽस्तु ते ॥ 19॥

शिवदूतीस्वरूपेण, हतदैत्यमहाबले ।
घोररूपे महारावे , नारायणि नमोऽस्तु ते ॥ 20॥

दं(म्)ष्ट्राकरालवदने, शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने, नारायणि नमोऽस्तु ते ॥ 21॥

लक्ष्मि लज्जे महाविद्ये, श्रद्धे पुष्टिस्वधे ध्रुवे ।
महारात्रि महाऽविद्ये, नारायणि नमोऽस्तु ते ॥ 22॥

मेधे सरस्वति वरे , भूति बाभ्रवि तामसि ।
नियते त्वं(म्) प्रसीदेशे, नारायणि नमोऽस्तु ते ॥ 23॥

सर्वस्वरूपे सर्वेशे, सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि , दुर्गे देवि नमोऽस्तु ते ॥ 24॥

एतत्ते वदनं(म्) सौम्यं(लँ), लोचनत्रयभूषितम् ।

पातु नः(स्) सर्वभीतिभ्यः(ख्), कात्यायनि नमोऽस्तु ते ॥ 25॥

ज्वालाकरालमत्युग्र- मशेषासुरसूदनम् ।
त्रिशूलं(म्) पातु नो भीतेर्- भद्रकालि नमोऽस्तु ते ॥ 26॥

हिनस्ति दैत्यतेजां(म्)सि, स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि, पापेभ्योऽनः(स्) सुतानिव ॥ 27॥

असुरासृग्वसापङ्क- चर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु, चण्डिके त्वां(न्) नता वयम् ॥ 28॥

रोगानशेषानपहं(म्)सि तुष्टा,
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां(न्) न विपन्नराणां(न्),
त्वामाश्रिता ह्याश्रयतां(म्) प्रयान्ति ॥ 29॥

एतत्कृतं(यँ) यत्कदनं(न्) त्वयाद्य,
धर्मद्विषां(न्) देवि महासुराणाम् ।
रूपैरनेकैर्बहुधात्ममूर्तिं(ङ्),
कृत्वाम्बिके तत्प्रकरोति कान्या ॥ 30॥

विद्यासु शास्त्रेषु विवेकदीपेष्-
वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहान्धकारे,

विभ्रामयत्येतदतीव विश्वम् ॥ 31॥

रक्षां(म्)सि यत्रोग्रविषाश्च नागा,
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये,
तत्र स्थिता त्वं(म्) परिपासि विश्वम् ॥ 32॥

विश्वेश्वरि त्वं(म्) परिपासि विश्वं(वँ),
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति,
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ 33॥

देवि प्रसीद परिपालय नोऽरिभीतेर्-
नित्यं(यँ) यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां(म्) प्रशमं(न्) नयाशु,
उत्पातपाकजनितां(म्)श्च महोपसर्गान् ॥ 34॥

प्रणतानां(म्) प्रसीद त्वं(न्), देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये, लोकानां(वँ) वरदा भव ॥ 35॥

देव्युवाच ॥ 36॥

वरदाहं(म्) सुरगणा, वरं(यँ) यन्मनसेच्छथ ।
तं(वँ) वृणुध्वं(म्) प्रयच्छामि, जगतामुपकारकम् ॥ 37॥

देवा ऊचुः ॥ 38॥

सर्वाबाधाप्रशमनं(न्), त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्य- मस्मद्वैरिविनाशनम् ॥ 39॥

देव्युवाच ॥ 40॥

वैवस्वतेऽन्तरे प्राप्ते, अष्टाविं(म्)शतिमे युगे ।
शुम्भो निशुम्भश्चैवान्या- वुत्पत्स्येते महासुरौ ॥ 41॥

नन्दगोपगृहे जाता, यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि, विन्ध्याचलनिवासिनी ॥ 42॥

पुनरप्यतिरौद्रेण , रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि, वैप्रचित्तां(म्)स्तु दानवान् ॥ 43॥

भक्षयन्त्याश्च तानुग्रान्, वैप्रचित्तान्महासुरान् ।
रक्ता दन्ता भविष्यन्ति, दाडिमीकुसुमोपमाः ॥ 44॥

ततो मां(न्) देवताः(स्) स्वर्गे , मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति, सततं(म्) रक्तदन्तिकाम् ॥ 45॥

भूयश्च शतवार्षिक्या- मनावृष्ट्यामनम्भसि ।
मुनिभिः(स्) सं(म्)स्मृता भूमौ , सम्भविष्याम्ययोनिजा ॥ 46॥

ततः(श्) शतेन नेत्राणां(न्), निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः(श्), शताक्षीमिति मां(न्) ततः ॥ 47॥

ततोऽहमखिलं(ल्ँ) लोक- मात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः(श्) शाकै- रावृष्टेः(फ्) प्राणधारकैः ॥ 48॥

शाकम्भरीति विख्यातिं(न्), तदा यास्याम्यहं(म्) भुवि ।
तत्रैव च वधिष्यामि, दुर्गमाख्यं(म्) महासुरम् ॥ 49॥

दुर्गा देवीति विख्यातं(न्), तन्मे नाम भविष्यति ।
पुनश्चाहं(य्ँ) यदा भीमं(म्), रूपं(ङ्) कृत्वा हिमाचले ॥ 50॥

रक्षां(म्)सि भक्षयिष्यामि, मुनीनां(न्) त्राणकारणात् ।
तदा मां(म्) मुनयः(स्) सर्वे, स्तोष्यन्त्यानम्रमूर्तयः ॥ 51॥

भीमा देवीति विख्यातं(न्) तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये, महाबाधां(ङ्) करिष्यति ॥ 52॥

तदाहं(म्) भ्रामरं(म्) रूपं(ङ्), कृत्वासङ्ख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय, वधिष्यामि महासुरम् ॥ 53॥

भ्रामरीति च मां(ल्ँ) लोकास्- तदा स्तोष्यन्ति सर्वतः ।
इत्थं(य्ँ) यदा यदा बाधा, दानवोत्था भविष्यति ॥ 54॥

**तदा तदावतीर्याहं(ङ्), करिष्याम्यरिसङ्क्षयम् ॥ 55॥**

**इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये**
**देव्याः स्तुतिर्नामैकादशोऽध्यायः ॥**

**उवाच 4, अर्धश्लोकः 1, श्लोकाः 50, एवम् 55, एवमादितः 630**

